# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** – ५ **गुणाः** - ७०

**विषयः** - स्वामिनारायणवेदान्तः (जे.) **कोड – CC 2.3.5. (NEW)** **समयः** - ०२ तः ०५

**दिनाङ्कः** - ०८/१२/२०१८ **सन्दर्भग्रन्थः** – हरिवाक्यसुधासिन्धुः

---

**प्रथमान्वितिः (Unit-1)**

प्रश्नः – १ **कयोश्चित् द्वयोः ससन्दर्भव्याख्या कार्या।** ५x२=१०

(१) तमुवाच हरिः साधो रूपाण्येषां तु लक्षणैः।
ब्रुवे पुराणप्रथितैर्ज्ञातव्यानि पृथक्पृथक् ॥

(२) अन्तर्यामिस्वरूपेण शक्तिद्वययुतश्च सः।
प्रतिजीवं स्थितो दत्ते तत्कर्मफलं प्रभुः ॥

(३) एवं कारणरूपेण सर्वत्रापि तदन्वयात्।
सर्वरूपः स एवेति वेदादिषु निगद्यते ॥

प्रश्नः – २ **कस्यचिद् एकस्य प्रश्नस्योत्तरं देयम्** १०x१=१०

(१) यथाग्रन्थं पञ्चभूतानां लक्षणानि लिखत

(२) एकपञ्चाशत्तरङ्गस्य सारतत्त्वं लेख्यम्।

**द्वितीयान्वितिः (Unit-2)**

प्रश्नः – ३ **कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या।** ५x२=१०

१. धर्मो ज्ञानं च वैराग्यं भक्तिश्चेत्यति दुर्लभाः।
अङ्गप्रधानभावेन भवेत्तेषां तु वर्त्तनम् ॥

२. चतुर्विंशतिरुक्तानि सांख्यं तत्त्वानि कापिलैः।
लक्षणानि च सर्वेषां तेषामपि पृथक् पृथक् ॥

३. गुणो यत्र समीक्ष्येत तस्मिन्नाशु भवेद्रतिः।
इतीक्ष्यते हि लोकेऽपि शृणु तास्य गुणं ब्रुवे ॥

प्रश्नः – ४ **कस्यचिद् एकस्य प्रश्नस्योत्तरं देयम्** १०x१=१०

(१) त्रिचत्वारिंशत्तरङ्गस्य सारतत्त्वं विमृशत।

(२) सप्तचत्वारिंशत्तरङ्गानुगुणं भक्तलक्षणानि वर्णयत

## तृतीयान्विति:(Unit - 3)

**प्रश्न: – ५ कयोश्चित् द्वयो: ससन्दर्भं व्याख्या कार्या ।** ५x२=१०

(१) अस्मिन्वपुषि जीवस्य वेदितृत्त्वं कियत्प्रभो
साक्षिणश्च कियत्तन्मे वक्तुमर्हसि तत्त्वत: ॥

(२) न तद्भासयते सूर्यो न शशांको न पावक: ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

(३) तत्र कारणरूपाणि देवास्तत्त्वाभिमानिन: ।
स्थूलसूक्ष्मशरीरराणि तत्कार्याण्यभवंस्तथा ॥

**प्रश्न: – ६ कस्यचिद् एकस्य प्रश्नस्योत्तरं लेख्यम्** १०x१=१०

(१) षट्चत्वारिशंदधिकशततमस्तरङ्गस्य सारतत्त्वं लिखत ।

(२) ब्रह्मचर्यं दृढं कथं भवेदिति सप्तषट्यधिकशततरंगानुसारं चर्चयत ।

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्न: – ७ अधोनोर्दिष्टेशु दशप्रश्नानामुत्तराणि लिखत ।** १x१०=१०

(१) कति ज्ञानेन्द्रियाणि ?

(२) ईश्वरस्य कति शरीराणि ? कानि च तानि ?

(३) प्रकाशकानां प्रकाशक: क: ?

(४) के उत्तमा: भक्ता: ?

(५) एकचत्वारिशत्तरङ्गे कति श्लोका: ?

(६) विराट्पुरुषस्य आयुष्यं कियत्?

(७) रमापते: कतिविधा: भक्ता: भवन्ति ?

(८) सांख्यशास्त्रस्य कर्ता क: ?

(९) तन्मात्राणि कति ?

(१०) के भगवन्तं निराकारं वदन्ति?

(११) शततमस्तरङ्गानुगुणं आनखदाशिखं का व्याप्या वर्तते ।

(१२) षट्चत्वारिंशदधिकशततमस्तरंगे कति श्लोका: सन्ति ?

(१३) हरिवाक्यसुधासिन्धो: ग्रन्थस्य कर्ता क: ?

(१४) जगत: कारणतत्त्वानि कति ?

(१५) सेतुमाला टीका केन विरचिता ?

*****************